# ८

राम! उत्तिष्ठ! तव हस्तौ दर्शय। त्वं केन हस्तेन लिखसि? आर्य! अहम् अनेन हस्तेन लिखामि। स दक्षिणहस्तः। अन्यः वामहस्तः। एकस्मिन् हस्ते पञ्च अङ्गुल्यः सन्ति। द्वयोः हस्तयोः दश अङ्गुल्यः सन्ति। पाणौ विविधाः रेखाः विद्यन्ते।

रामः उपविशतु। कृष्णः उत्तिष्ठतु। कृष्ण! त्वं हस्ताभ्यां नेत्रे स्पृश। वयं नेत्राभ्यां किं कुर्मः। वयं नेत्राभ्यां पश्यामः। हस्ताभ्यां कर्माणि कुर्मः। अन्येषां प्राणिनां द्वे नेत्रे विद्येते; हस्तौ न स्तः।